# द्वैतवेदान्ते चैतन्यावधारणा

महामहोपाध्याय

**एस्.वि. भीमभट्टः**

ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।

अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

चतुरशीतिलक्ष जीवयोनि समाकुलं अनन्ताश्चर्यमयमिदं ब्रह्माण्डं भूतभौतिक संख्यातिग पदार्थैः संकीर्णं अनन्तकालादारभ्य दृष्टिगोचरी भवति । तस्यास्य विश्वस्य उत्पत्तिः स्थितिः प्रवृत्तिः पार्यन्तिक परिणामः इत्यादयः विचाराः मानव प्रज्ञया अगम्याः तथाऽपि पूर्वाचार्य दर्शित मार्गानुरोधेन अस्य जीवलोकस्य रहस्यपरिशोधनं द्वैतसिद्धान्तानुरोधेन यावत्कृतं तस्य सामान्यतः विहङ्गावलोकनं अस्मिन् लघुनि लेखने विवरीतुं प्रयत्यते ।

चेतना चेतनभेदेन प्रायः पदार्थः सर्वेऽपि द्विविधः इत्यङ्गीकुर्वन्ति विमर्शकाः तत्र अचेतनः प्रकृते न विचारणीयः तत्प्रसंगाभावात् । चेतनेविचार्यमाणे चार्वाकाः देहातिरिक्तः चेतनः नास्त्येव इति मन्यन्ते । बौद्धाः क्षणिकज्ञानपरंपरां चेतनइत्यङ्गीकुर्वन्ति । आर्हताः देहपरिमाणः सप्तभंगीसंयुक्तः ज्ञानाधारः चेतनइत्यङ्गीकुर्वन्ति । प्रायः अन्ये सर्वेऽपि ज्ञानाधारः विभुः सर्वत्र व्याप्तः चेतनः इति ऊरीकुर्वन्ति ॥

द्वैतदर्शनेतु स्वतन्त्रमस्वतन्त्रंच द्विविधं तत्त्वमिष्यते । स्वतन्त्रो भगवान् विष्णुः इत्युक्त्वा अस्वतन्त्र तत्त्वमध्ये चेतनः जीवाख्यः निवेशितः । तत्र परमात्मा स्वतन्त्र चेतनः । लक्ष्म्यादयः सर्वेऽपि अनित्यकोटि प्रविष्टाः । तत्र लक्ष्मीं एकां हित्वा अन्ये सर्वेऽपि चेतनाः अज्ञान दुःखभयमोहादियुक्ताः ते संसारिणश्च । तत्र परमात्मा सर्वव्याप्तः । गीतायां परमात्मनः कृष्णस्य विश्वरूपं दृष्ट्वा अर्जुनः एवं आश्चर्येण उद्गिरति । "द्यावापृथिधिव्योरिदमन्तरंहि व्याप्तं त्वयैकेन दिशश्च सर्वाः"। इति परमात्मनः

रूपं अनादिमध्यान्तं अनंतवीर्यं इत्येवं स्तौति । स परमात्मा समस्तं जगत् सृजति प्रपालयति लीलया हन्ति अनेकान् जीवान् स्वगतिं प्रयापयति । अस्य परमात्मनः परमचेतनस्य प्रदीप्तात् हुताशात् यथा विष्फुलिंगाः निस्सरन्ति तद्वत् अनेके अवताराः आविर्भवन्ति । तस्य अज्ञान लेशोऽपि नास्ति। सः सर्वज्ञः भ्रान्ति लेशरहितः स्वकीयस्मृति कीर्तन प्रणत्यादिभिः जीवानाम् उद्धारार्थं स्वस्वरूपाभिन्नान् अनन्तान् अवतारान् प्रकटयति ।

नित्योनित्यानां चेतनश्चेतनानां एको बहूनां यो विदधातिकामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिः शाश्वतीनेतरेषां ॥

इति कठश्रुतौ परमात्मना साकं जीवात्मनां कीदृशः उपकार्योपकारक भावः इत्ययं विषयः समीचीनतया प्रदर्शितः ।

तत्र परिपूर्णानन्तगुणत्वं परमात्मनः लक्षणम् । अनन्ताः अपि परमात्मनो गुणाः प्रत्येकं निरवधिकाः । सर्वत्र तेनादृष्टं क्वचिदपि किंचिदपि नास्ति । स देवः जगतः उत्पत्ति स्थितिसंहारनियतिज्ञानाज्ञानबन्ध मोक्षान् यथायोग्यं विधत्ते । यः सर्वज्ञः स सर्ववित् यस्य ज्ञान मयं तपः इति ग्रुत्यनुसारेण स सर्वज्ञः । भूतभावि-भविष्यत् चेतनाचेतनात्मकवस्तूनि तत्तद्व्यक्तित्वेन प्रकारेण स जानाति । परमात्मनः गुणाः न मापिकाः नौपाधिकाः । सर्वेऽ तत्स्वरुपभूताः । परमात्म भिन्नं सर्वंवस्तु तेन सृज्यते । स इदंसर्वमसृजत इतिश्रुतेः । परमात्मनो गुणाः तद्भिन्नाःश्चेत् सृष्टा भवेयुः । तेषां नाशे परमात्मनः स्वरुपहानिरेवस्यात् परमात्मनः गुणात्मकदेहवत्वात् गुणगुणिनोर्भेद एव नास्ति ।

परमात्मनोऽवताराः मनुष्यदेहेषु सर्वेऽपि, जगति च सर्वस्मिन् सर्वेऽपि सन्ति। श्वेतद्वीपवैकुण्ठानन्तासनाख्य नित्यलोकेषु विद्यमानस्य परमात्मनः मूलरुपस्य एषामवताररुपाणां च मात्रयापि भेदः नास्ति । लोकस्थरुपाणां नियम्यनियामकभावादिना भेदोऽपि नास्ति । स्थानभेदेनापि भेदो नास्ति । केवलं लीलया स भेदमज्ञानांमोहाय प्रदर्शयति। सर्वेऽप्ययमंशः कठोपनिषदि निस्संशयमुट्टंकितः

तथाहि ।

यदेवेह तदमुत्र यदमुत्र तदन्विह ।

मृत्योस्स मृत्युमाप्नोति यइह नानेव पश्यति ॥ (कठ द्वितीयाऽध्याये प्रथमवल्लि १०)

भगवन्मूलरूपावताररूपेषु भेदं भेदाभेदं वा यो जानाति स नित्यदुःखात्मकं तम आप्नोति । भगवद्रूपाणामिव भगवदवयव गुणकर्मणामपि भगवता भेदः भेदाभेदो वा नानुसन्धेयः पर्वतेषु ऊर्ध्वभागे शिखरे वृष्टमुदकं अधो विविधतया धावति तथा परमात्मनः धर्मान् अवतारान् गुणान् क्रियाः परमात्मना भिन्नतया यः पश्यति स महान्तमनर्थं तम आख्यं प्राप्नोति तदिदमाहोपनिषत्

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।

एवंधर्मान् पृथक्पश्यंस्तानेवानुविधावति ॥ (कठ.प्र-द्वि-प्र-१४) ननु परमचेतनस्य परमात्मनः अनन्तगुणपरिपूर्णत्वं कथं घटते । यतो विमर्शकधौरेयाः तार्किकाः महेश्वरे ज्ञानेच्छा कृतीः संख्या परिमाण - पृथक्त्व संयोग विभागानष्टावेव गुणान् परिगणयन्ति । तत्रेदमुत्तरम् । तत्र परमात्मा परमुख्यया वृत्त्या सर्वशब्दवाच्यः। तथा च सर्वशब्दप्रवृत्ति - निमित्तभूता गुणाः परमात्मनि मुख्यतः तत्तच्छब्दवाच्याः वरीवृत्यन्ते । स च जडजीवप्रकृतिभ्योऽत्यन्त विलक्षणः । जडं प्रकृत्यादि, ब्रह्मादयो जीवाः प्रकृतिर्महालक्ष्मीः । तेभ्योऽत्यन्त विलक्षणः परमात्मा । तत्र प्रमाणं तु द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरःसर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ इति गीता । ब्रह्मा शिवः सुरेशाद्याः शरीरक्षरणात् क्षराः । लक्ष्मीरक्षरदेहत्वादक्षरातत्परो हरिः । इति श्रुतिश्च । अत्र क्षराक्षरपदाभ्यां चेतनमेव गृह्यते क्षरजडस्याक्षर जडमात्रस्य च ग्रहणे तदुत्तमत्वज्ञानं मोक्षोपयोगि न सिध्यति । तत्रैव योमामेवमसंमूढो जानाति पुरुषोत्तमम् । सर्वविद् भजतिमां सर्वभावेनभारत। इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुदध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत ॥ इति वचनेन अत्रोक्तं सर्वं मिथ्या इति संमोह वर्जितः यः एतद्

गुह्यतमं तत्त्वं जानाति, ज्ञात्वा च मनुते ध्यायति च स जिज्ञासुः, योगमारुरुक्षुः बुद्धिमान् अपरोक्षज्ञानी कृतकृत्यः मुक्तश्च भवतीति वचनात् विष्णोः सर्वोत्तमत्वज्ञानं रहस्यतमं मोचकं च इति ज्ञायते। सच परमात्मा जन्माद्यष्टकर्ता। सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बंधमोक्षौ च पुरुषान् यस्मात् स हरिरेकराट् ॥ इति प्रमाणानुसारेण सृष्टिस्थितिसंहारनियमन ज्ञानाज्ञानबंधमोक्षाख्य व्यापाराष्टकस्य मुख्यतः कर्ता परमात्मा श्रीहरिरेव । ननु परमात्मनः सृष्ट्याद्यष्टकर्तृत्वं न युक्तं । स हि शरीरवान् वा उताशरीरः। आद्येऽस्मदादिवत् मृति संसार बन्धाद्यापत्तिः तस्यापि ।

शरीराभावे च जगत्सर्जनं न संभवति । एवमाशंकायामुच्यते परमात्मा शरीरवानेव। परंतु ज्ञानानन्दाध्यात्मककल्याणविग्रहवान् । तस्य च विग्रहस्य ज्ञानानन्दात्मकपरमात्मस्वरूपत्वेन विनाशः न संभवति । प्राकृतदेहस्यैव हि विनाशः संभवति। ननु भगवतः भगवदात्मक ज्ञानानन्दादि देहवत्वेपि नयनश्रोत्रहस्तपादाद्यभावे अंधबधिर कुणिपंगुवत् तस्य जगत्कर्तृत्वानुपपत्तिः इति लौकिकाः शंकेरन् अत्र वयं वदामः। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् इत्यादि प्रमाणैः परमात्मा सकलेन्द्रियपाटववान् इत्येवमंगीक्रियते । अपाणिपादो जवनोगृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । इत्यादिकंतु प्राकृतेन्द्रियराहित्यपरम्। अप्राकृतेन्द्रियाणितु तस्य संत्येव। तस्मादानन्दचिद्देहं चिदानन्द शिरोमुखम् । चिदानन्द भुजम् ज्ञान सुखैक पदसंगुलिं । आकेशादानखाग्रेभ्यः पूर्णचित्सुखशक्तिकम् इति प्रमाणानुसारेण सर्वत्र सर्वरूपेष्वपि भगवान् ईदृश एव। तत्र दिव्यज्ञानिनः केचिदेव तं सर्वदा प्राकृतलोकेष्वपि एवमेव पश्यन्ति । साधारणजनास्तु मोक्षयोग्याः भक्ति सहित श्रवणमनननिदिध्यासनैः तमपरोक्षीकृत्य लिंगदेहभंगानन्तरमप्राकृतं वैकुण्ठादिलोकेषु तं सर्वदा पश्यन्ति । नानाविधभोगान् भुंजानाः रमन्ते । बह्मरुद्रादिवदयं कदापि न पराधीनः । किन्तु सर्वतन्त्रस्वतन्त्रः । समस्तब्रह्माण्डे विद्यमान जीवानां शरीरेषु स विद्यमानोपि जीवशरीरगतदुःखादिलेपहीनः आनन्दी विराजते विहरति च । तथाहि श्वेताश्वतरश्रुतिः द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति इति । वस्तुतः द्वैतदर्शने स्वतन्त्रमस्वतन्त्रंच द्विविधं

तत्वमिष्यते । तत्र स्वतन्त्रः भगवान् विष्णुरेक एव । तथाहि गीतायामेकादशेऽर्जुन वचनम् - पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः लोकत्रयेऽप्यप्रतिमप्रभाव ॥ (गीता ११ - ४३)

एकमेवाद्वितीयं इत्युपनिषदपि परमात्मानं सर्वस्वतन्त्रमुद्धोषयति । परमस्वतन्त्रस्यापि परतन्त्रत्वविज्ञानं परमात्मनः परमा अवज्ञा तस्य अवज्ञायाः फलं परमा दुर्गतिः नरकवासरूपा भवति । हरेरीश्वरः (स्वामी) कदापि क्वापि कश्चिदपि न विद्यते । श्रीमन्नारायणभिन्नस्य जगतः चेतनात्मकस्य स्वातन्त्र्यं नानामानविरुद्धम् । स्वतन्त्रो भगवान् विष्णुरेकएव । मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय - इति गीतायां भगवान् कृष्ण एव स्वस्वरूपं स्पष्टमाह। नास्ति नारायण समं न भूतं न भविष्यति । एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् । सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात् परं नास्ति न दैवं केशवात् परम् । इत्यादीन्यनेकानि वचनानि परमात्मनः सर्वापेक्षया स्वतन्त्रत्वबोधकानि जाग्रति । अत्रेयं शंका उदीयात् । एकमेवाद्वितीयं परमात्मतत्वम् इति भवद्भिरुच्यते, परंतु रामकृष्णाद्यनेकरुपाणि दरीदृष्यन्ते। एवं महादेवः चतुर्मुखः सुब्रह्मण्यः गणेशः काली, दुर्गा इत्यादयः अनेकदेवता विशेषाः अन्यान्यैः भक्तैर्भिन्नतया अंगीक्रियन्ते । ते एव सर्वोत्तम चेतनस्वरूपा इत्यप्यंगीक्रियन्ते । अस्याः विमतेः किमुत्तरं स्यादिति ? एवमुत्तरं वदामः । परमात्मा श्रीमन्नारायणः । मत्स्यकूर्माद्यनन्तानि रूपाणि सर्वथा स्वाभिन्नानि भिन्नानीव प्रकटयति । प्रदर्शयति च । अज्ञानिनः तानि भिन्नानि इति विमुह्यन्ति । महादेवादिरूपाणि यान्युक्तानि तानि सर्वाण्यपि परमात्मसन्निधान युक्तानि भिन्नानिरूपाणि । (श्रुतिस्मृतिषु अनुक्तानि क्रैस्तवमहदीयांगीकृतानि परमात्मनो अन्यानिरूपाणि सर्वाण्यपि मोहकल्पितानि तेषामुपासनया परमानन्दरूपः पुरुषार्थः सर्वथा न प्राप्यते ।) अन्ते वचनमेकं निर्धारणपूर्वकमुक्त्वा द्वैतदर्शने परमचैतन्य स्वरूपविषयक शास्त्रीय वचनगुम्फनमुपसंहरामः । अदुःखमितरत्सर्वं जीवा एवतु दुःखिनः । तेषां दःखप्रहाणाय श्रुतिरेषा प्रवर्तते । इति वचनानुसारेण निर्दुःख निरतिशायानन्दारूपावस्थिति रूपमोक्ष एव सर्वेषां दर्शनानां परमोद्देश्यरूपः । तत्प्राप्तये तादृशं नित्यानन्द रूपं निखिलशक्तिमत् स्वाश्रितानपि यत् तत्त्वं स्वस्वरूपं प्रापयितुं क्षमं तादृशं किंचित्

परमचैतन्यमंगीकर्तव्यम् । तदेव श्रीमन्नारायणः । स निर्दोषः सर्वप्रभुः । अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि । तावदेवेश्वरो नाम तत्र भेदोऽपि न क्वचित् ॥ इदं द्वैतदर्शने परमचैतन्य विषये सिद्धान्तितं वचः ॥ इदानीं द्वैतदर्शनरीत्या जीवचैतन्यविचारः अपि यावच्छक्ति संक्षेपतः प्रस्तूयते । स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते । स्वतन्त्रो भगवान्। जीवाः सर्वेऽपि तद्वशाः । अज्ञानभयमोहादियुक्ताः संसारिणो जीवाः । सर्वेऽपि जीवाः अहंशब्दवाच्यस्वस्वरूपात् तदितर सर्व-जीवजडापेक्षया भिन्नः इत्येवं साक्षिस्वरूप नित्याबाध्य स्वात्मानुसंधानवन्तो विजानन्ति ।

जाग्रत्स्वप्नसुषुप्त्याख्यासु त्रिष्वप्यवस्थासु जीवस्य अहमित्याकारक साक्ष्यात्मक ज्ञानेन सह जाग्रत्स्वप्नमूर्च्छावस्थासु वृत्तिरूपं ज्ञानमप्यस्ति । तत्र मूर्च्छावस्थाविषयं विशेषतः न विचारयामः, इदानीमप्रस्तुतत्वात् ।

सर्वेऽपि जीवचेतनाः अणुपरिमाणवन्तः । वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः सचानंत्याय कल्पते । इति श्वेताश्वतरोपनिषदुक्तरीत्या जीवः परमाणुस्वरुपः । ते च जीवाः असंख्याकाः । अनागता अतीताश्च यावन्तः सहिताः क्षणाः । अतीतानागताश्चैव यावन्तः परमाणवः । ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक् । परमाणु प्रदेशेऽपि ह्यनन्ता जीवराशयः ॥ अनेन प्रमाणेन परमात्मा यथानन्तरूपः तद्वत् जीवा अपि असंख्याकाः । न केवलं जीवाः । सर्वेऽपि मिलित्वा अनन्ताः, किन्तु-गणशोऽप्यनन्ताः । ब्रह्मपदयोव्याः ऋजवोनाम जीवा अनन्ताः । एवं गरुड रुद्रादि पदयोग्या अपि जीवा अनन्ताः । एवं सर्व पदयोग्या अपि जीवाः गणशोऽप्यनन्ताः सन्ति । एते च जीवाः मुक्तियोग्याः नित्यसंसारिणः तमोयोग्याश्चेति त्रिविधाः । तत्र मुक्तियोग्याः देव ऋषिपितृचक्रवर्ति मनुष्योत्तमभेदेन पंचविधाः । अस्मिन् दर्शने सात्विकजीवा एव मुक्तियोग्याः । चतुर्मुखब्रह्माणमारभ्य तृणजीवपर्यन्तं मुक्तियोग्याः सन्ति । तत्र मुक्तियोग्यजीवानां तमोयोग्यजीवानां च स्वभावदिकं गीतायां विशेषतः षोडशेऽध्यायेऽन्यत्रापि, एवं श्रुति स्मृतीतिहासादिष्वपि निष्कृष्टतया संप्रदर्शितम् । लेशतः किंचित् दर्शयामः अभयं सत्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः ।

दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ अहिंसा सत्यमक्रोधः त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं ॥ तेजः क्षमाधृतिः शौचमद्रोहो नातिमानिता । भवन्ति संपदं दैवीमभिजातस्य भारत॥ दैवी संपद्विमोक्षाय । अनेन श्लोकसमुदायेन सात्विका एव मोक्षभागिनः इति निर्धारितं भवति । नित्यं सुखदुःखमिश्राः नित्यसंसारिणः । ते च नित्यसंसारिचेतनाः मध्यम मानवाः एवासंख्याताः सर्वदा स्वर्गभूनिरयचारिणः एतादृशाश्चेतनाः सन्तीत्यत्र प्रमाणम् । त्रैविद्ध्याः मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यमासाद्य सुरेन्द्रलोकं अश्नन्ति दिव्यान् दिवि देवभोगान्॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति । एवं त्रयीधर्ममनुप्रपन्नाः गतागतं काम कामा लभन्ते ॥ (गीता आ ९ - श्लो २०-२२) चोष्कूयते विश इन्द्रो मनुष्यान् (श्रुतिः) इन्द्रः परमैश्वर्यशाली परमात्मा विशः मध्यम मनुष्यजीवान् चोष्कूयते पुनः पुनः भृशं वा संसारे परिवर्तयति। ये यथावत् परमात्मानमज्ञात्वा तं द्विषन्ति स जीवाभिन्नः तस्मिन् विद्यमानाः गुणाः सर्वेऽपि मिथ्या सर्वेधर्माः व्यावहारिकाः परमार्थतः सनिर्धर्मकः स एव ब्रह्मनामकः परमचेतनः निर्विकल्पकज्ञानमात्रस्वरूपः समस्तं जगत् मिथ्या समस्त विकल्प रहित केवल ज्ञानरूपस्य स्वरूपापत्तिरेव मोक्षः इतियेऽभ्युपयन्ति ते चेतनाः तमो योग्याः । ते चतुर्विधाः दैत्याः राक्षसाः पिशाचाः मनुष्याधमाश्चेति । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी। मामात्म परदेहेषु प्रद्विषन्तोऽभ्यसूयकाः एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्मणः क्षयाय जगतोऽहिताः । तानहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्नाः मूढ़ा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततो यान्त्यधमांगतिम् ॥ आभिर्गीतावाग्भिः मिथ्याज्ञानिनः जीवाः नित्यनरकमाप्नुवन्तीति निश्चप्रचं ज्ञायते । किंच सात्विकी, राजसी, तामसी चेति श्रद्धा त्रिविधा । तत्र तामस्याश्रद्धया तामसीगतिर्भवति । श्रद्धा च जीवचैतन्यरूपा । योयच्छ्रद्धः स एव सः । (गीता) एवं सर्वेऽपि जीवचेतनाः मुक्तौ संसारे च परस्परं परमात्मना चभिन्नाः । संसारे मुक्तौ च तारतम्योपेताः ॥

एवं द्वैतदर्शने चैतन्यस्वरूपमित्यस्मिन् विषये यथामति यथावकाशं विवेचनं कृतम् । अत्र विशेषप्रमाणानि तद्विमर्शश्च न कृतः । स्वस्वरूपाविर्भाव एव मोक्ष इति द्वैतदर्शनस्य परमः सिद्धान्तः । स्वरूपं च प्रतिचेतनंभिन्नं भिन्नम् । तदनुसारेणैव सर्वे प्रमाणप्रमेयादयाः *दर्शनेऽस्मिन् विचारिताः निर्णीताश्च ।*

निश्शेषदोषरहित कल्याणाखिल सद्गुण ।
भूतिस्वयंभु शर्वादिवंद्यं त्वां नौमिमेप्रियम् ॥

एतेन श्रीमध्वभगवत्पादस्य पद्यवाचनेन लेखमिममुपसंहरामि ।